# संस्कृत-वार्ता:

दिनाङ्क :- 12/01/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्र मोदी-जर्मन जांसलर फ्रेडरिक मर्त्ज च गुजरात-राज्ये गांधीनगरे एकं उच्चस्तरीयं सम्मेलनं सहभागितवन्तौ।
- भारत-जर्मनी-देशाभ्यां महत्त्वपूर्णानि नवदश सन्धिपत्राणि हस्ताक्षरितानि।
- प्रधानमन्त्री नरेन्द्र मोदी नवदिल्ल्यां प्रवर्तमान वर्षीय विकसित-भारत-यंग लीडर्स डायलॉग इत्यस्य समापन सत्रस्य सहभागित्वं करोति।
- केन्द्रीय पर्यावरण, वन ऋतुपरिवर्तन मन्त्रिणा भूपेन्द्र यादवेन प्रोक्तं यत् प्राथमिक-कृषि-ऋण समितानां दृढ़तम-अन्तर्जाल-कारणात् भारतदेश: कस्यापि वैश्विक-आर्थिक संकटात् सम्मुखीकर्तुं सन्नधो वर्तते।
- ईराने प्रशासनं विरुध्य षोडश दिनेभ्यः देशव्यापी विरोध- प्रदर्शनं प्रचलति। अमेरिका स्थितेन मानवाधिकार-कार्यकर्त्रा उक्तं यत् मृतकानां संख्या चतुश्चत्वारिंशदुत्तर-पञ्चशतं संवृत्ता।
- महिला प्रीमियर् लीग इति स्पर्धामालिकायाम् अद्य रोयल् चैलेन्जर्स बैङ्गलूरुदलम् यूपी वरियर्स् दलेन सह क्रीडिष्यति।

---

<u>प्रधानमन्त्री</u>

प्रधानन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् भारत-जर्मनी देशयो: मध्ये द्विपक्षीय व्यापार: साम्प्रतं यावत् उच्चतम-स्तरे सम्प्राप्त:। प्रधानमन्त्री नरेन्द्र मोदी-जर्मन जांसलर फ्रेडरिक मर्त्ज च गुजरात-राज्ये गांधीनगरे महात्मामंदिरे एकं उच्चस्तरीयं सम्मेलनं सहभागितवन्तौ। भारत-जर्मनी देशौ उद्घोषितवन्तौ यत् रक्षा, व्यापार प्रविधि क्षेत्राणि, रणनीतिक-सम्बन्धा: च उपवेशनात् अस्मात् अग्रे सरिष्यन्ति । रक्षा औद्योगिक सहयोगं सुदृढ़ीकर्तुं उभौ देशौ सहविकास-सहउत्पादने च केन्द्रितं घोषणा-पत्रमेकं हस्क्षरिवन्तौ । एकं संयुक्त-वार्ताहर- सम्मेलनं

सम्बोधयन् फ्रेडरिक मर्त्ज, प्रधानमन्त्री च भणिवन्तौ यत् भारत-जर्मनी देशौ केवलं आर्थिक-सहयोगिनौ न स्त:, वरन् वैश्विक शान्तये, स्थिरतायै च उभौ राष्ट्रौ प्रतिबद्धौ स्त:।

अवसरेऽस्मिन् श्रीमोदी प्रतिपादितवान् यत् भारत-जर्मनी देशयोमध्ये रणनीतिक-व्यापार: उच्चतम-स्तरं सम्प्राप्त:, साम्प्रतं इदं पञ्चाशत् अर्बुद्-डॉलर त: अधिक: जात:। श्रीमोदी भणितवान् यत् भारतदेशे द्वि-सहस्राधिक जर्मनी देशीय समवाया: दीर्घ-कालात् भारतदेशे कार्यरता: सन्ति।

प्रधानमन्त्रिणा प्रतिपादितं यत् उभयो: देशयो: मध्ये प्राविधिक-सहयोग: प्रतिवर्षं दृढतम: जात:। अद्य अस्य परिलक्षिता मूलाधारे अपि स्पष्ट-रूपेण दरीदृश्यते । संक्षिप्त रूपेण जर्मन – देशीय चांसलर-फ्रेडरिक-मर्त्ज वर्येण भणितं यत् उभौ देशौ स्वीय सम्बन्धा: उच्चतर-स्तरे आनेतुं प्रयासरतौ वर्तेते। इत: प्राक् उभौ नेतारौ अहमदाबादे ऐतिहासिक साबरमती आश्रमस्य यात्रा विहितवन्तौ। तत्र तौ राष्ट्रपितु: महात्म-गान्धिन: स्मृतिचिन्हे श्रद्धा कुसुमानि समर्पितवन्तौ । उभौ नेतारौ महात्मा-गान्धिन: आत्मनिर्भरता-सत्य-अहिंसां च प्रति अपृथक-प्रतिबद्धता-युतान् मूल्यान् प्रति गभीरं सम्मानं प्रकाशितवन्तौ । उभौ नेतारौ साबरमती रिवरफ्रंट-स्थलं पतंग-महोत्सवेऽपि समाविष्टौ। श्री फ्रेडरिक मर्त्ज वर्य: अद्य प्रात: कालावधौ अहमदाबादे स्वीय द्वि-दिवसीय-यात्रार्थं प्रधानमन्त्रिण: श्री नरेन्द्र मोदिन: आमन्त्रणे समागत: ।

------------------------------------------------------

## भारत-जर्मनी

भारत-जर्मनी-देशाभ्यां महत्त्वपूर्णानि नवदश सन्धिपत्राणि हस्ताक्षरितानि। सममेव उभाभ्यां देशाभ्यां रक्षोद्यौगिक-सहयोगं द्रढयितुम् अष्ट घोषणाः विहिताः। व्यापार-निवेशं समेधितुम् चीफ एग्जीक्यूटिव ऑफिसर्स फोरम इत्यस्य स्थापना अपि एतासु सम्मिलिता। वार्ताहर-सम्मेलनं सम्बोधयन् भारतीय विदेशसचिवः विक्रम मिसरी अवदत् यत् जर्मन चांसलर इत्यस्य भारतयात्रावधौ देशद्वयोः मध्ये महत्त्वपूर्णं संवादः अभवत्।

------------------------------------------------------

**प्रधानमन्त्री –वीबीवाईएल**

प्रधानमन्त्री नरेन्द्र मोदी नवदिल्ल्यां प्रवर्तमान वर्षीय विकसित-भारत-यंग लीडर्स डायलॉग इत्यस्य समापन सत्रस्य सहभागित्वं करोति। असौ देश-विदेशे त्रि-सहस्राधिकै: यूनै: सम्भाषणं करिष्यति।

---------------------------------------------------------

**भूपेन्द्र –सहकारी समिति**

केन्द्रीय पर्यावरण, वन ऋतुपरिवर्तन मन्त्रिणा भूपेन्द्र यादवेन प्रोक्तं यत् प्राथमिक-कृषि-ऋण समितानां दृढ़तम-अन्तर्जाल-कारणात् भारतदेश: कस्यापि वैश्विक-आर्थिक संकटात् सम्मुखीकर्तुं सन्नधो वर्तते।

---------------------------------------------------------

**राष्ट्रपति डोनाल्डट्रंप**

ईराने प्रशासनं विरुध्य षोडश दिनेभ्यः देशव्यापी विरोध- प्रदर्शनं प्रचलति। अमेरिका स्थितेन मानवाधिकार-कार्यकर्त्रा उक्तं यत् मृतकानां संख्या चतुश्चचत्वारिंशदुत्तर-पञ्चशतं संवृत्ता। तत्र अन्तर्जाल सेवा दूरभाषा सेवा च बाधिते स्तः। अत्रान्तरे अमेरिकायाः राष्ट्रपतिना डोनाल्डट्रंपेण उक्तं यत् सः ईरानेन सह संवादं कर्तुमिच्छति।

---------------------------------------------------------

**एआईआईएमएस-शीतवायु:**

अखिल-भारतीय-आर्युविज्ञान-चिकित्सा-विज्ञान-संस्थान एम्स इत्यनेन नवदिल्ल्यां स्वीय दिङ्गनिर्देशा: प्रसारिता: यत् ये रुग्णा रक्तचाप-किडनी सम्बद्ध रोगेभ्य: ग्रस्ता: सन्ति तेषां कृते शीतलहर्य्या: प्रकोप: हानिकारक: वर्तते। तेभ्य: समये-समये स्वीय स्वास्थ्य अन्वीक्षणं विधातव्यम्।

---------------------------------------------------------

## उपराष्ट्रपतिना सी.पी. राधाकृष्णनेन

उपराष्ट्रपतिना सी.पी. राधाकृष्णनेन उक्तं यत् शिक्षायाः उपयोगः असमानताः न्यूनीकर्तुं कोणस्थान् समुदायान् सशक्तं विधातुम् अथ विकासः देशस्य कोणेषु सुनेश्चेतुं करणीयः। राजधान्यां नवदिल्ल्यां जवाहरलाल नेहरू विश्वविद्यालयस्य नवम-दीक्षान्त- समारोहं सम्बोधयन् उपराष्ट्रपतिः अवदत् यत् शिक्षा न केवलं चरित्र निर्माणं करोति मानसं बुद्धिं च दृढतां प्रददाति।

-----------------------------------------------------

## डीआरडीओ टेस्ट

रक्षा-अनुसन्धान-विकास-संघटन-डी.आर.डी.ओ. इत्यनेन ह्यः हैदराबादे गतिशील-लक्ष्ये उच्चस्तरीय-आक्रमण-क्षमता युतं मानव-पोर्टेबल-टैंक-रोधि-निर्देशितं प्रक्षेपास्त्रं सफलताया प्रक्षेपितम्। रक्षा मन्त्रिणा राजनाथ सिंहेन सफल-परिक्षणाय डी.आर.डी.ओ. संघटनस्य सहयोगिभ्य:, उद्योग जगत-वैज्ञानिकेभ्य: शुभाशया: प्रकटिता:।

-----------------------------------------------------

## राष्ट्रिय-युवा दिवस:

अद्य राष्ट्रीय-युवा दिवस: वर्तते। दिवसोऽयं प्रतिवर्षं महान् आध्यात्मिक-नेतु: दार्शनिकस्य च स्वामिविवेकानन्दस्य जन्म जयन्त्या: अवसरे परिपाल्यते। अवसरे अस्मिन् राष्ट्रपति: द्रौपदी मुर्मु:, उपराष्ट्रपति: सी.पी. राधाकृष्णन, प्रधानमन्त्री नरेन्द्रमोदी च स्वामिन: जयन्त्यां तस्मै श्रद्धाञ्जल्य: समर्पितवन्त: । राष्ट्रपतिना प्रोक्तं यत् स्वामीविवेकानन्द: शाश्वत:, दूरदृष्टा, आध्यामिकता युत: महान् दार्शनिक नेता अवर्तत । उपराष्ट्रपतिना प्रोक्तं यत् स्वामी विवेकानन्देन स्वीय जीवने शिक्षायां च आन्तरिक-शक्तिं, आत्म-अनुशासनं, निस्वार्थ सेवां च सार्थक-जीवनं च स्तम्भ रूपेण प्रतिपादितम्। प्रधानमन्त्रिणा आशा अभिव्यक्ता यत् राष्ट्रीय युवा दिवस: सर्वेषां देशवासिनां, विशिष्टतया युव-जनानां कृते नूतन-शक्ति:, नवीन-आत्मविश्वास: च आनयेत्। तेन भणितं यत् स्वामि-विवेकानन्दस्य व्यक्तित्वं तेषां कार्याणि च विकसित-भारतस्य कल्याणाय नूतन-ऊर्जाया: सञ्चार: करिष्यति।

-----------------------------------------------------

## इसरो-पीएसएलवी-सी62

इसरो इत्यस्य ऐषमः प्रथमं प्रक्षेपणम् अद्य जातम्। इदं सतीश-धवन-अन्तरिक्ष-केन्द्र-श्रीहरिकोटात: पी.एस.एल.वी. सी 62 / ई.ओ.एस. –एन 1 इत्याख्यम् अभियान् आरब्धं जातम्। एतत् भारतीयान्तरिक्ष-अनुसन्धान-संघटनस्य नवक्रमिकं विशिष्ट-वाणिज्यिकम् अभियानं विद्यते। अत्र चतुष्षष्टितमे प्रक्षेपणे प्राविधिक-समस्या समागतास्ति। भारतीय-अन्तरिक्ष-अनुसन्धान-संघटन-इसरो इत्यस्य अध्यक्षेण डॉ. वी. नारायणेन प्रोक्तं यत् सम्पूर्णं विवरणं विश्लेषितमस्ति।

-----------------------------------------------------

## संसद बजट सत्र

केन्द्रीयम् आयव्यय-सङ्कल्पनापत्रं रविवासरे फरवरी माससस्य प्रथमे दिने लोकसभायां प्रस्तोस्यते। संसदः आयव्यय-सङ्कल्पनासत्रम् अस्य मासस्य अष्टविंशतिः दिनाङ्के आरप्सस्यते। अप्रैलमासस्य द्वितीय दिनं यावत् चलिष्यति। राजधान्यां नवदिल्ल्यां वार्ताहर-सम्मेलने लोकसभाध्यक्षः ओम बिरला अवोचत् यत् फरवरी मासस्य प्रथमे दिने लोकसभायाम् आयव्ययसङ्कल्पनासत्रे चर्चा आरब्धा भविष्यति।

-----------------------------------------------------

## शिवराज सिंह चौहान

केन्द्रीय-कृषि-कृषक-कल्याण- मन्त्रिणा शिवराज सिंहचौहानेन युवनेतारः प्रतिबद्धतया अनुशासनेन च सह लक्ष्यं प्रापयितुं प्रोत्साहयत्। असौ अद्य नवदिल्ल्यां विकसित-भारत-युव-नेतृ-संवाद-कार्यक्रमं सम्बोधयति स्म। अपि च उक्तं यत् समर्पणं ध्यानम् आंतरिकशक्तिः च नेतृत्वाय आवश्यकाः गुणाः सन्ति। राष्ट्रनिर्माणे उद्देश्यपूर्णजीवनं सामूहिकोत्तरदायित्वम् अपि कृषिमन्त्रिणा सबलं प्रतिपादिते।

-----------------------------------------------------

## क्रिकेट

महिला प्रीमियर् लीग इति स्पर्धामालिकायाम् अद्य रोयल् चैलेन्जर्स बैङ्गलूरुदलम् यूपी वरियर्स् दलेन सह क्रीडिष्यति। भारतीयसमयानुसारेण स्पर्धा सायं सार्धसप्तवादने मुम्बयाम् आरब्धा भविष्यति।

।। इति वार्ताः ।।